








श्रीमत् वेदान्त रामानुज मुनि करुणालब्ध वेदान्त युग्मम्
श्रीमत् श्रीवास योगीश्वर गुरुपदयोर्पित स्वात्मभारम्
श्रीमत् श्रीरङ्गनाताह्वय मुनिकृपया प्राप्त मोक्षाश्रमं तं
श्रीमत् वेदान्त रामनुज मुनिमपरम् संश्रये देशिकेन्द्रम्



श्रीमत् श्रीवास योगीश्वर मुनि करुणालब्ध वेदान्त युग्मम्
श्रीमत् वेदान्त रामानुज गुरुपदयोर्पित स्वात्मभारम्
श्रीमत् श्रुत्यन्त रामानुज यति नृपतेः प्राप्त मोक्षाश्रमं तं
श्रीमत् श्रीवास रामनुजमुनिं संश्रये ज्ञानवार्धिम्



वेदान्त लक्ष्मण मुनीन्द्र कृपात्त बोधम्
तत्पाद युग्म सरसीरुह भृङ्गराजम्
त्रय्यन्त युग्म कृतभूरि परिश्रमं तं
श्रीरङ्ग लक्ष्मणमुनिम् शरणं प्रपद्ये

# श्री कृष्ण अष्टोत्तर शतनामावळिः

***shrI kR^iShNa aShTottara shatanAmAvaLiH***

# श्री कृष्ण अष्टोत्तर शतनामावळिः

ओं श्रीकृष्णाय नमः

ओं कमलानाथाय नमः

ओं वासुदेवाय नमः

ओं सनातनाय नमः

ओं वासुदेवात्मजाय नमः

ओं पुण्याय नमः

ओं लीला मानुष विग्रहाय नमः

ओं श्रीवत्स कौस्तुभ धराय नमः

ओं यशोदा वत्सलाय नमः

ओं हरये नमः

ओं चतुर्भुजात्त चक्रासि-गदा-शङ्खादि उदायुधाय नमः

ओं देवकी नन्दनाय नमः

ओं श्रीशाय नमः

ओं नन्दगोप प्रियात्मजाय नमः

ओं यमुना वेग संहारिणे नमः

ओं बलभद्र प्रियानुजाय नमः

ओं पूतना जीवित हराय नमः

ओं शकटासुर भञ्जनाय नमः

ओं नन्दव्रज जनानन्दिने नमः

ओं सच्चिदानन्द विग्रहाय नमः

ओं नवनीत विलिप्ताङ्गाय नमः

ओं नवनीत नटाय नमः

ओं अनघाय नमः

ओं नवनीत नवाहाराय नमः

ओं मुचुकुन्द प्रसादकाय नमः

ओं षोडशस्त्री सहस्रेशाय नमः

ओं त्रिभङ्गी मधुरा कृतये नमः

ओं शुक वागमृताब्धीन्दवे नमः

ओं गोविन्दाय नमः

ओं योगिनां पतये नमः

ओं वत्स वाट चराय नमः

ओं अनन्ताय नमः

ओं धेनुकासुर भञ्जनाय नमः

ओं तृणीकृत तृणावर्ताय नमः

ओं यमळार्जुन भञ्जनाय नमः

ओं उत्ताल ताल भेत्रे नमः

ओं तमाल श्यामला कृतये नमः

ओं गोप गोपीश्वराय नमः

ओं योगिने नमः

ओं कोटि सूर्य सम प्रभाय नमः

ओं इळापतये नमः

ओं परस्मै ज्योतिषे नमः

ओं यादवेन्द्राय नमः

ओं यदूद्वहाय नमः

ओं वनमालिने नमः

ओं पीतवाससे नमः

ओं पारिजात अपहारकाय नमः

ओं गोवर्धनाचलोद्धर्त्रे नमः

ओं गोपालाय नमः

ओं सर्व पालकाय नमः

ओं अजाय नमः

ओं निरञ्जनाय नमः

ओं काम जनकाय नमः

ओं कञ्ज लोचनाय नमः

# श्री कृष्ण अष्टोत्तर शतनामावळिः

ओं मधुघ्ने नमः
ओं मधुरानाथाय नमः
ओं द्वारका नायकाय नमः
ओं बलिने नमः
ओं बृन्दावनान्त सञ्चारिणे नमः
ओं तुलसीदाम भूषणाय नमः
ओं स्यमन्तक मणेर्हर्त्रे नमः
ओं नर नारायणात्मकाय नमः
ओं कुब्जा कृष्टाम्बर धराय नमः
ओं मायिने नमः
ओं परम पुरुषाय नमः
ओं मुष्टिकासुर चाणूर मल्लयुद्ध विशारदाय नमः
ओं संसार वैरिणे नमः
ओं कंसारये नमः
ओं मुरारये नमः
ओं नरकान्तकाय नमः
ओं अनादि ब्रह्मचारिणे नमः
ओं कृष्णाव्यसन कर्शकाय नमः
ओं शिशुपाल शिरश्छेत्रे नमः
ओं दुर्योधन कुलान्तकाय नमः
ओं विदुराक्रूर वरदाय नमः
ओं विश्वरुप प्रदर्शकाय नमः
ओं सत्यवाचे नमः
ओं सत्य सङ्कल्पाय नमः
ओं सत्यभामारताय नमः
ओं जयिने नमः
ओं सुभद्रा पूर्वजाय नमः

ओं विष्णवे नमः
ओं भीष्म मुक्ति प्रदायकाय नमः
ओं जगत् गुरवे नमः
ओं जगन्नाथाय नमः
ओं वेणुनाद विशारदाय नमः
ओं वृषभासुर विध्वंसिने नमः
ओं बाणासुर करान्तकाय नमः
ओं युधिष्ठिर प्रतिष्ठात्रे नमः
ओं बर्हि बर्हा वतंसकाय नमः
ओं पार्थसारथये नमः
ओं अव्यक्ताय नमः
ओं गितामृत महोदधये नमः
ओं काळियफणि माणिक्य रञ्जित श्रीपदाम्बुजाय नमः
ओं दामोदराय नमः
ओं यज्ञ-भोक्रे नमः
ओं दानवेन्द्र विनाशकाय नमः
ओं नारायणाय नमः
ओं परब्रह्मणे नमः
ओं पन्नगाशन वाहनाय नमः
ओं जलक्रीड समासक्त गोपी वस्त्रापहारकाय नमः
ओं पुन्यश्लोकाय नमः
ओं तीर्थपादाय नमः
ओं वेदवेद्याय नमः
ओं दयानिधये नमः
ओं सर्व देवात्मकाय नमः
ओं सर्वग्रह रूपिणे नमः
ओं परात्पराय नमः

ओं श्रीकृष्णाय नमः